International Journal of Sanskrit Research 2022; 8(2): 133-134

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(2): 133-134
© 2022 IJSR
www.anantaajournal.com
Received: 18-12-2021
Accepted: 05-02-2022

**G Jayalakshmi**
Ph.D Scholar, Sanskrit & Indian Culture, Sri Chandrasekharendra Viswa Mahavidyalaya, Deemed University, Enathur, Kanchipuram, Tamil Nadu, India

**Corresponding Author:**
**G Jayalakshmi**
Ph.D Scholar, Sanskrit & Indian Culture, Sri Chandrasekharendra Viswa Mahavidyalaya, Deemed University, Enathur, Kanchipuram, Tamil Nadu, India

# तत्त्वमुक्ताकलापे ईश्वरतत्वविचारः

**G Jayalakshmi**

**प्रस्तावना**

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय श्रीवेदान्तगुरवे नमः।।

विशिष्टाद्वैतमतप्रचारकः सर्वतन्त्रस्वतन्त्र श्रीमद्वेदान्तदेशिकेन अनुगृहीतं तत्वमुक्ताकलापो नाम ग्रन्थरत्नं जगत्प्रसिद्धम्। इदं मूलग्रन्थोपाख्यो स्त्रग्धरावृत्तगुम्भितः पञ्चशतम् पद्यमयसूत्रम्। एतत् रामानुजाचार्यसिद्धान्त सम्मतं सकलवेदान्तार्थसंग्रहः। तस्य सर्वार्थसिद्धिनामकः स्वोपज्ञवृत्तिग्रन्थो दर्शनान्तरोक्ततत्तद्युक्तिप्रमाणादिविवेचनपूर्वकं तदीयसिद्धान्तखण्डनमुखेन स्वमतसंरक्षणार्थं निर्धारणाय च प्रगल्भते। तस्मिन् विशेषरूपेण श्रीमान् वेदान्तदेशिकेन नायकसरद्वये ईश्वरविचारः क्रियते। तद्यथा-

व्याप्त्याद्याकुलाभिः श्रुतिभिरधिगतो विश्वनेता स विश्वं
क्रीडाकारुण्यतन्त्रः सृजति समतया जीवकर्मानुरुपम्।
रोषोपि प्रीतये स्यात्सुनिरसतया निस्सीमसक्तेः
स्वेच्छयां तस्सर्वसिद्धिं वदति भगवतोवासकामत्ववादः।।

अर्थात् यः विश्वस्य कर्त्ता अर्थः ईश्वरः नेता व्याप्ति अव्याकुलाभिः श्रुतिवाक्येषु अधिगतः। तस्य विश्वनेतायाः व्यापारः क्रीडा एव। क्रीडा लीला इति अर्थः। स लीला एव करोति। तत् कारुण्येन तन्त्रिता सन्नपि विश्वं सृजति। सः जीवानां पुण्यपापकर्माणानुसारेण फलं यच्छति। तेन प्रकारेण समानरुपेण स्वेच्छया जीवानां अभिलाषान् पूरयति। तस्य अपारः असीमः शक्तिः। तस्य गणना कर्त्तुम् न शक्यते। असीमो नाम सीमारहितः। अपारो नाम पाररहितः। ईश्वरस्य निस्सीमशक्त्या रोषः अर्थात् क्रोधोपि प्रीत्या सुनिरसतया जनान् स्वेच्छया प्रयच्छति। सः समस्त कामान् सर्वसिद्धिं अवाप्तम् वदति।

इह जगत् ईश्वरेण निर्मितः। ईश्वरः जगत्कारणकर्त्ता। यथा कुलालः घ़टं करोति। कुलालः तु स्वशरीरेणयुक्तं निर्माति, तथैव ईश्वरः अपि सशरीरयुक्तः भव्यमाने कुलालः स्वशरीरे स्थिते आत्मानं न पश्यति। प्रति जीवः स्वान्तर्हितः आत्मानं न जानाति। अत्र इहधातुरध्यक्षबाधः। तत् आत्मानं द्रष्टुं न शक्यते तु इतर आत्मानं कथं पश्यति। एतत् सर्वं योग्यादृष्टाभावात् न स्वीकृतम् स्वेतरात्मा। श्रुतिभिः देहानपेक्षे तस्मिन् देहबन्धात् न बाधं अवसिते। वेदेभ्यः अनुमानेन न पुरूषवचः बद्धवैरम् तिष्ठति इति। धर्मप्रवृत्तियुक्तसर्वदेशकाल व्यापितं यान्यथाकरणशङ्कानर्हाभिरिति। यद्वा अनुमानव्व्याप्तिपक्षधर्मतानिरुपणजनितव्यभिचारसंभवादिभिरिति।

श्रुतिभिरिति भ्रमादिमूलत्वासंभवख्यापनम्। विश्वषां यथेष्टं विनियोक्ता इति विश्वनेता। श्रुतिभिरधिगतो कारणवाक्येषु सदादिशब्दैः तद्धेदं तर्ह्यव्याकृतमासीत् इति प्रदर्शितस्याव्याक्तापरपर्यायस्य प्रधानस्याभिधानादिति चेत्, तन्न, अव्यक्तस्य तदैक्षत, सः अकामयत इत्याद्यस्वसङ्कल्पपूर्वकसृष्ट्याद्यसंभवात्। न खलु ईक्षणादिशब्दो भाक्तः, मुख्ये बाधकाभावस्य साधकभूयस्त्वस्यच शारीरिके स्थापितत्वात्।

सदेव सोम्येदमग्र आसीत् इत्यादि अचेतनसामाधिकरण्यात् कारणमचेतनमिति चेत् न, सामाधिकरण्यस्य स्थूलसूक्ष्मचिदचिद्वस्तु विशिष्टविवक्षयापि उपपत्तेः। सर्वं च जगत् कर्तुश्शरीरतयाम्नातम्, अस्मान्मायी सृजते विश्वमेतत्। ननु सविद्यायां मृत्पिण्डलोहमणिनखनिकृन्तनदृष्टान्तैः यथा पृथिव्यामोषधयस्संभवन्तीत्यथर्वणिकवाक्याच्चाचेतनमात्रोपादानत्वं जगतः प्रतीयत इति चेन्न, मृत्पिण्डादिनिदर्शनानामेकविज्ञानेन सर्वविज्ञानस्यासंभवचोद्यपरिहार-परत्वात्, यथा पृथिव्यामिति वाक्यस्यत्वेकस्माद्विचित्रानन्तोत्पतिसंभवार्थत्वात्। न तु चेतननैरपेक्ष्यमेतैस्सूच्यम् अन्यथा यथा सतः पुरूषात्केशलोमानिति चेतनसन्निधिसापेक्षोत्पत्तिनिदर्शनायोगात्। तद्व्यस्कातादिनयेननिर्व्यापारपुरूषा -सन्निधानात् प्रकृतेः प्रवृत्तिः, सर्वस्य च कार्यजातस्य जीवकर्महेतुकत्वात्, अपहताप्मत्वसर्वज्ञत्वादीनां च तस्मिन्नवस्थाभेदेनोपपत्तेरिति, तन्न। यथोर्णनाभिस्सृजते गृह्णते इदं प्रथमोक्तदृष्टान्तवैघट्यात्।

प्रकृतिं पुरूषं चैव प्रविश्यात्मेच्छया हरिः।
क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययौ।।
इति पुरूषस्यापि पराधिष्ठाने जगत्सृष्ट्युपयोगोक्तेः।

न च जीवस्य संवर्तसमयसंहृतकरणकलेवरस्य मुख्येक्षणादिसंभवः। मुक्तस्तर्हि प्रकृतिपुरूषयोरधिष्ठाता स्यात्, तस्य सत्यसंकल्पस्य स्वेच्छया पितृलोकादिविचित्रकार्यस्रष्टत्वाम्नानान्मुख्येक्षणसिद्धेः। जीवान्यत्ववादाश्च बद्धान्यत्वविषयाः स्युः। ममैवांशो जीवलोके जीवभूतस्सनातन इति जीवत्वस्यावस्थारूपत्वोक्तेः, मुक्तस्यैव हिरण्यगर्भादिदेहाधिष्ठानेन सृष्टिस्थित्यादिहेतुत्वमिति सर्वपुराणादिसामरस्यमिति, तदपि मन्दम्। एकस्यैवानाद्यन्तस्य सर्वमुक्तोपसृप्यत्वश्रवणात्, मम साधर्म्यमागताः, स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदत इत्याद्युपबृंहणविरोधाच्च।

मोक्षधर्मे च अनेन साम्यं यास्यामीति मुमुक्षोरभिसन्धिवचनम्। प्रपञ्चितं चैतत्- परेण पर(धर्मी च) धर्मेण भवत्येष समेत्य वै इत्यादिभिः एकस्य च सर्वप्रशासितृत्वं निस्सीमत्वं च श्रुतिस्मृतिशतसिद्धम्। अपि च मुक्तास्सर्वे किं संभूय जगत् सृजन्ति उत प्रतिनियतकार्याः - नाद्यः स यदि पितृलोककाम इत्यादिभिरव्यवस्थितेच्छादृष्टेः, सर्वेषामेकरूपच्छाक्लृप्तो गौरवात्, तथा चाश्रवणात्। न द्वितीयः इदं सर्वमसृजतेत्यादिभिरेकस्य सर्वकर्तृत्वोक्तेः। समुदायैकत्वविवक्षा तु क्लिष्टा निर्मूला च, श्रुत्या क्लृप्त्या वा तदयोगात्। अतः पतिं विश्वस्यात्मेश्वरमिति श्रुत एक एव सर्वकर्तेश्वरः।

## संदर्भ सूची


1. Fundamental of Visistadvaita Vedanta by S.M.Srinivasachari on. Tamilnadu, 2004.
2. Yatindramatdeepika by P.N. Srinivasa dasa. Translated by Swami Adidevananda on. Tamilnadu, 1949.
3. Sarvarthsiddhi of Vedanta Desika by sadagopan on 2017. Tamilnadu.
4. Tatparya prakasika of Vedanta Desika by vadula Srinivasacharya, new uttamurviraraghavachariar. Tamilnadu. 2018.
5. Sarvarthasidhi gudarthaprakasa of Vedanta Desika Saumya varada ramanujacharya on Tamilnadu, 1999.